## 2.3.2 शिक्षक प्रभावी शिक्षण और सीखने की प्रक्रियाओं के लिए ऑनलाइन संसाधनों सहित आईसीटी-सक्षम टूल का उपयोग करते हैं

## *Teachers use ICT- enabled tools including online resources for effective teaching and learning processes*

---

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सर्वाभ्यः कक्षाभ्यः निर्मितः पाठ्यक्रमः विशेषतया सर्वेषां छात्राणां कृते महान् उपयोगी वर्त्तते। एतस्य पाठ्यक्रमस्य अवबोधनं कक्षासु गुरुचरणेषु अविश्य सारल्येन कुर्वन्त्येव पुनरपि अस्मिन् पाठ्यक्रमे अन्यपि प्रभावोत्पादनाय अस्य विश्वविद्यायस्य अध्यापकाः अध्ययनाध्यापन प्रक्रियायै अन्तर्जाले समुपलब्धाः सामग्रीः अन्तर्भाव्य सूचना-सञ्चार-प्रौद्यौगिकी (सू.सं.प्रौ.) समन्वितानि उपकरणानि उपयुञ्जते। एषा सूचना-सञ्चार-प्रौद्योगिकी यदि प्रयुज्यते तर्हि शिक्षायां महती वृद्धिर्भवति तदपि च सरलतयैव जायते।

अयं विश्वविद्यालयः विविधासु कक्षासु विभिन्नाम् पाठ्यक्रमान् सञ्चालयतिं एतेषु सर्वेष्वपि पाठ्यक्रमेषु अत्रत्य अध्यापकाः अन्तर्जाले समुपलब्धाः सामग्रीः छात्राणां सम्यग् अवबोधनाय प्रयुञ्जते। तस्य प्रयोगेण तं तं विषयं छात्राः सहजतयैव बुद्धिगम्यं विधाय स्वजीवने तत् सर्वं सफलीकुर्वन्ति।

क्षेत्र संकुचित न वर्तते किन्तु महद् विस्तृतं वर्त्तते। शिक्षा इत्युच्यमाने न केवलम् अध्ययनम् अध्यापनम् अपि तु बहूनि तत्र अङ्गानि शिक्षाया भवन्ति। तद्यथा –

| | |
|---|---|
| अध्ययनम् | सम्प्रेषणम् |
| अध्यापनम् | शिक्षायाः प्रचारः प्रसारश्च |
| मूल्याङ्गनम् | ग्रन्थानां लेखनं प्रकाशनञ्च |
| अनुसंधानम् | शिक्षणपद्धतीनां विकासः |
| प्रस्तुतीकरणाम् | |

अध्ययनम् – स्वस्वकक्षासु अधीयानाः छात्राः अध्ययनकाले अन्तर्जालभाध्यनेन अपि यदि अध्ययनसामग्रीः अन्विष्य तत् पठन्ति तर्हि तेषां कृते अतीव लाभदायकं तत् भवति। तेन छात्राणां समयावशेषोऽपि भवति येन ते अवशिष्टस्य समयस्य अन्यत्रापि सदुपयोगं कर्तुं शक्नुवन्ति। अस्मिन् सम्पूर्णानन्दसंस्कृतविश्वद्यालयेऽपि छात्राः अन्तर्जाले प्राप्ताः सामग्रीः अन्विष्य तेषां स्वाध्ययने उपयोगं कुर्वन्ति।

अध्यापनम् – छात्राणामिव अध्यापकानां कृतेऽपि अर्न्तजाले लब्धा सामग्री महती उपयोगिनी भवति। तस्याः सामग्रयाः प्रयोगं ते अध्यापकाः स्वज्ञानवर्द्धनाय शिष्याणां च रुच्युत्यादनाय कुर्वन्ति। अध्यापकाः यदि पाठ्यक्रमे नियुक्तानां पुस्तकानां विषयम् अन्तर्जाले अन्वेषयन्ति तर्हिं बहुविधं नूतनं ज्ञानं नवीनाः पक्षाः नूत्ना च दृष्टिरुपलभ्यते। तेन छात्राणां शिक्षकणाञ्चोभयोरपि भूयान् लाभो भवति।

मूल्याङ्कनम् – अध्यापकैः छात्राणाम् अध्यापनान्ते तेषां मूल्याङ्कनय बहुविधाः प्रक्रियाः स्वीक्रियन्ते। तद्यथा – मौखिकी परीक्षा, लिखितपरीक्षा, दृश्योपकरणेषु अधीतविषयस्य प्रस्तुतीकरणम् इत्यादिकम्। एवं छात्राणां मूल्याङ्कनाय अपि अन्तर्जालस्य भूयसी आवश्यकता भवति यत्प्रभुज्य शिक्षकाः छात्राणां सम्यक् मूल्याङ्कनं अल्पीयसि एव काले कर्तुं पारयन्ति।

अनुसन्धानम् – अनुसन्धानस्य अर्थ एव भवति कस्यचित् नवीनस्य वस्तुनोऽन्वेषणम्। अन्तर्जाले समुपलब्धाः सामग्रीः अस्माकं अन्वेषणतत्त्वानि वर्धापयन्ति। अन्तर्जाले कस्यचिदपि वस्तुनोऽन्वषणं सारल्येन कर्तुं शक्यते। अत्रत्य अध्यास्वाध्यापनविषयवस्तुनः गवेषणाय तत्र समुपलब्धाः सामग्रीः अन्विष्य तेषाम् अध्यापने प्रयोगं कुर्वन्ति।

प्रस्तुतीकरणम् – अस्याः प्रौद्योगिक्या प्रयोगः कत्वा कस्यापि विषयवस्तुनः प्रस्तुतीकरणं सम्यकरूपेण कर्तु शक्यमतं अध्यापकाः स्वविषयस्य प्रस्तुतीकरणाय एतस्याः भूरि उपयोगं कुर्वन्ति।

सम्प्रेषणम् – अन्तर्जालमाध्यमेन कस्यापि विषयस्य वस्तुनः सम्प्रेषणं झटिति कतुं शक्यते तेन कालातिपातः कस्य अपि न भवति अतोऽध्यापकैः अस्याः प्रयोगो विधीयते।

शिक्षायाः प्रचारः प्रसारश्च – इमां प्रौद्योगिकी प्रयुजय शिक्षायाः प्रचार, प्रसारश्च सरलया भवति अतः छात्रेषु समााजेषु वा शिक्षाम् आद्यातुम् इमां प्रौद्योगिकी अध्यापकाः सम्यक् रूपेण प्रयुञ्जते।

ग्रन्थानां लेखनं प्रकाशनं च – एतां पद्धतिम् आश्रित्य ग्रन्थानां अन्तर्जाले एवं विलिख्य तेषां प्रकाशने सौविध्यं भवति। तत्र लेखनेन पृथक् प्रयासोऽतिरिक्तो न करणीयो भवति। अतः अस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अध्यापकाः स्वीयानि पुस्तकानि लेखनसमये एतस्याः प्रौद्योगिक्याः उपयोगम् अवश्यमेव कुर्वन्ति।

शिक्षापद्धतीनां विकासः - शिक्षायाः याः अपि पद्धत्यः सन्ति तासां विकासाय तु सूचना प्रचार प्रौद्योगिक्या महती आवश्यकता भवत्येव। अत एव अस्य विश्वविद्यालयस्य शिक्षकैः शिक्षार्थिभिश्च आसां पद्धतीनां विकासाय स्वस्तरेण अस्याः प्रौद्योगिक्याः यथासामर्थ्यम् उपयोगक्रियते येन विधिवत् शिक्षणपद्धतीनां सुचारुरूपेण विकासः स्यात्

स्मार्टकक्षाप्रकोष्ठः - संस्कृतभाषायाः सम्यगवबोधाय तस्य जीवनाधानाय संग्रस्क (ऑनलाइन) माध्यमेन तस्य प्रशिक्षणाय च अस्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये एकस्य स्मार्टकक्षाप्रकोष्ठस्य विनिमार्णं विहितं वर्तते यस्यः प्रयोगेण छात्राः शीघ्रमेव गूढं विषयमपिप बुद्धिसात् कुर्वन्ति।

सङ्गणकप्रकोष्ठः - छात्राणां सङ्गणकक्षेत्रे ज्ञानविवृद्ध्यर्थं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सङ्गणकप्रकोष्ठोऽपि विद्यते यत्र छात्राः यथासमयं समागत्य तद्विषयज्ञेभ्यः प्रशिक्षणं प्राप्नुवन्ति। अध्यापकाः अपि सङ्गणकविषये रुचिवर्धापनाय मध्ये मध्ये कक्षासु छात्रान् प्रेरयन्ति। शिक्षणाधिगमप्रक्रियायं सूचना-सञ्चार-प्रौद्योगिक्याः आवश्यकताम् अनुभूयैव अस्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये तत्सम्बद्धानि इमानि उपकरणानि वर्त्तन्ते –

| | |
|---|---|
| दृश्योपकरणम् | दूरदर्शनम् |
| श्रव्योपकरणम् | अङ्कपेटिका (लैपटाप) |
| प्राजेक्टर | चित्रग्राहकम् (कैमरा) |
| शैक्षिकतन्त्रांश | यान्त्रिकपट्टम् (डिजिटल बोर्ड) |
| सङ्गणकम् | |

अस्मिन् विश्वविद्यालये यथाकालं भवत्सु कार्यक्रमेषु एषां सर्वेषाम् उपकरणानां ज्ञानपद्धतिं सरलीकर्तुम् उपयोग क्रियते। सङ्गणकमाध्यमनेन सर्वेषां कार्यक्रमाणां रूपरेखा, तेषां कार्यक्रमाणां सङ्ग्रहणम् तथा चान्यैरपि उपकरणैः कार्यक्रमाः यथा – राष्ट्रीया/अन्ताराष्ट्रीया संगोष्ठी, कार्यशाला, विदुषां व्याख्यानानि, छात्राणां प्रतियोगिताः च इत्यादयो रुचिकराः कृत्वा मान्यन्ते।